# A-I/1/1302/22

## प्रथमसत्रार्द्धम्

## प्रथमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. कं आचार्यमतमनुसृत्य मोक्षाकरगुप्तपादेन तर्कभाषा व्यलेखि?

2. कस्य दर्शनसम्प्रदायस्य बौद्धस्य ग्रन्थः तर्कभाषेति?

3. केन महाविहारेण सम्बद्धः तर्कभाषाकारः? पाठ्यग्रन्थदिशा लिखत।

4. बौद्धदिशा प्रमाणलक्षणं लिखत।

5. अर्थक्रियास्थितिः का?

6. बौद्धन्यायदिशा प्रत्यक्षलक्षणं लिखत।

7. प्राभाकाराणां मीमांसकानां मते प्रमाणनामानि लिखत।

**अथवा**

सांख्याभिमतप्रमाणनामानि लिखत।

8. अनुमानं किम्? पाठ्यग्रन्थदिशा सूचयत।

9. बौद्धनये प्रत्यक्षभेदान् लिखत।

10. सामान्यलक्षणं किम्?

**अथवा**

किं नाम स्वलक्षणम्? पाठ्यग्रन्थदिशा उत्तरत।

11. कल्पना का?

12. सामान्यं कतिविधम्? मोक्षाकरगुप्तदिशा उत्तरत।

13. का नाम समाख्या ?

**अथवा**

बौद्धेतरतर्कभाषाकारस्य कमप्येकस्य नामोल्लेखं कुरुत।

14. मनोविज्ञानं किम् ? बौद्धदिशा सूचयत।

**अथवा**

अर्थापत्तिः का ?

15. शब्दप्रमाणं बौद्धाः स्वीकुर्वन्ति वैयाकरणा वा ?

**अथवा**

इन्द्रियज्ञानं कतिविधम् ? पाठ्यग्रन्थदिशा लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पाठ्यग्रन्थस्य कारिकामेकां विलिख्य (या प्रश्नपत्रे नागता स्यात्) तस्याः विवृतिं कुरुत।

17. बौद्धनये प्रमाणलक्षणप्रदर्शनपूर्वकं तद्वैशिष्ट्यं उपनिबद्धीकुरुत।

**अथवा**

सप्रसङ्गं व्याख्यात –

कल्पितः कर्मकर्त्रादि परमार्थो न विद्यते।
आत्मानमात्मनैवात्मा निहन्तीति निरुध्यते॥

18. योगिज्ञानं किम् ? बौद्धदिशा सूचयत।

**अथवा**

प्रसङ्गपूर्वकं व्याख्यायताम्—

भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम्॥

19. स्वसंवेदनं किम् ? चित्तचैत्तानां स्वसंवेदनत्वविषये मोक्षाकरगुप्तस्य मतं पाठ्यग्रन्थदिशा स्पष्टीकुरुत।

20. प्रमाणफलव्यवस्था का? बौद्धनये तस्याः योगदानं लिखत।

**अथवा**

प्रत्यक्षस्य स्वलक्षणविषयत्वे आचार्यमोक्षाकरगुप्तस्य का दृष्टिः? सम्यक्तया विवेच्यताम्।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. बौद्धतर्कभाषायाः महत्त्वमधिकृत्य निबन्धमेकं उपनिबद्धीकुरुत।

**अथवा**

विविधासु तर्कभाषासु बौद्धतर्कभाषायाः ऐतिह्यक्रमनिर्धारणपूर्वकं पाठ्यांशं संक्षिपत।

**अथवा**

प्रमाणसंख्याविप्रतिपत्तिनिरासपूर्वकं बौद्धाभिमतप्रमाणद्वयं सकारणं व्याख्यात।

# A-I/2/1303/22

## प्रथमसत्रार्द्धम्

## द्वितीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. अभिधर्मकोशकारस्य अपरः ग्रन्थः कः? लिखत।

2. अधीतग्रन्थस्य प्रथमकोशस्थानस्य नाम किम्?

3. कति इन्द्रियाणि? नामानि लिखत।

4. अभिधर्मकोशस्य मङ्गलपद्यं लिखत।

5. कति आयतनानि? कानि च तानि?

6. असंस्कृतधर्माः के? लिखत।

**अथवा**

क्लेशैः भवार्णवे कः भ्रमति?

7. कति स्कन्धानि? कानि च तानि?

8. अभिधर्मकोशस्य कति कोशस्थानानि? तेषां नामानि लिखत।

9. निरोधः कतिविधः? नामानि लिखत।

**अथवा**

आकाशस्य स्वभावं बौद्धदिशा लिखत।

10. रूपं कतिविधम्?

11. कतिविधः शब्दः?

12. धातवः कति? के च ते?

**अथवा**

'अभिधर्म' पदस्य कोऽर्थः?

13. किं नाम विज्ञानम् ?

**अथवा**

कति विज्ञानकाया: ?

14. प्रतिघ: क: ? स च कतिविध: ?

15. अविज्ञप्ति: का ?

**अथवा**

कति महाभूतानि ? नामानि लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. स्वस्मृत्या पाठ्यग्रन्थस्य कारिकामेकां विलिख्य संस्कृतगिरया सम्यग् विवेचनीया। (या प्रश्नपत्रेऽत्र नागता स्यात्)

17. सप्रसङ्गं व्याख्येयम् –

धर्माणां प्रविचयमन्तरेण नास्ति, क्लेशानां यत उपशान्तयेऽभ्युपाय:।

क्लेशैश्च भ्रमति भवार्णवेऽत्र लोकस्तद्धेतोरत उदित: किलैष शास्त्रा॥

**अथवा**

पञ्च बाह्या द्विविज्ञेया नित्या धर्मा असंस्कृता:।

धर्मार्घ इन्द्रियं ये च द्वादशाध्यात्मिका: स्मृता:॥

18. सम्यक्तया विवेचयत –

प्रतिसङ्ख्यानिरोधो यो विसंयोग: पृथक् पृथक्।

उत्पादात्यन्तविघ्नोऽन्यो निरोधोऽप्रतिसङ्ख्यया॥

**अथवा**

सवितर्कविचारा हि पञ्चविज्ञानधातव:।

अन्त्यास्त्रयस्त्रिप्रकारा: शेषा उभयवर्जिता:॥

19. सप्रसङ्गं व्याख्येयम् –

विक्षिप्ताचित्तकस्यापि योऽनुबन्धः शुभाशुभः।

महाभूतान्युपादाय सा ह्यविज्ञप्तिरुच्यते॥

**अथवा**

धर्मस्कन्धसहस्राणि यान्यशीतिं जगौ मुनिः।

तानि वाङ् नाम वेत्येषां रूपसंस्कारसंग्रहः॥

20. अभिधर्मकोशस्य मङ्गलपद्यं विलिख्य तस्य व्याख्या विधेया।

**अथवा**

षण्णां विज्ञानानां परिचयम् उपस्थापयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. अभिधर्मकोशकर्तुः देशकालकृतीनां परिचयपूर्वकं दर्शनक्षेत्रे तस्यावदानमभिलक्ष्य निबन्धमेकं लिखत।

**अथवा**

अभिधर्मपिटकस्य परिचयपुरस्सरं निबन्धमेकं लिखत।

**अथवा**

अभिधर्मकोशस्य प्रथमकोशस्थानस्य सारमधिकृत्य निबन्धमेकं लिखत।

# A-I/3/1304/22

## प्रथमसत्रार्द्धम्

## तृतीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. विज्ञप्तिमात्रतासिद्धेः विंशतिकायां कति कारिकाः सन्ति?

2. आचार्यवसुबन्धोः कश्चन् अपरः ग्रन्थः स्यात्तर्हि नामोल्लेखं कुरुत।

3. अधीतग्रन्थस्य स्वस्मृत्या एकां कारिकां लिखत या प्रश्नपत्रेऽस्मिन् नागता स्यात्।

**अथवा**

विंशतिकायाः प्रथमां कारिकां लिखत।

4. आवरणं कतिविधम्? नामानि लिखत।

**अथवा**

विज्ञप्तिमात्रताया अनुभवः शब्दैः वक्तुं शक्यते न वा?

5. आचार्यवसुबन्धुः योगाचारी माध्यमिको वा?

6. विज्ञप्तिः कतिविधाः? नामानि लिखत।

7. 'विज्ञप्तिमात्रतासिद्धिः' इति शब्दे मात्रतापदस्य प्रयोगः कथम्?

8. बाह्यार्थवादिनः के? वैभाषिकाः विज्ञानवादिनो वा?

**अथवा**

विनेयजनाः के? अस्य पदस्य कोऽर्थः?

9. विज्ञप्तिमात्रतायाः ज्ञानं कः कर्त्तुं क्षमः? पृथग्जनः बुद्धो वा?

10. धर्मनैरात्म्यं किम्?

11. परमाणुवादिनः के? विज्ञानवादिनः वैशेषिकाः वा?

12. 'मरणं परविज्ञप्तिः' इत्यनेन किं वक्ष्यति आचार्यः?

**अथवा**

नैरात्म्यं कतिविधम्? नामानि लिखत।

13. 'विज्ञप्तिमात्रतासिद्धिः' कस्य विज्ञानवादिसम्प्रदायस्य ग्रन्थः?

**अथवा**

पाठ्यग्रन्थे परमाणूनां सिद्धिः जायते न वा? सूचयत।

14. सन्तानानियमः कीदृशः सिद्धः? ग्रन्थदिशा सूचयत।

15. कति आयतनानि? नामानि लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पाठ्यांशस्य एकां कारिकां विलिख्य सप्रसङ्गं व्याख्यात या कारिका पत्रेऽस्मिन् नागता स्यात्।

17. सप्रसङ्गं व्याख्यात –

देशादिनियमः सिद्धः स्वप्नवत् प्रेतवत् पुनः।

सन्तानानियमः सर्वैः पूयनद्यादिदर्शने॥

**अथवा**

परचित्तविदां ज्ञानमयथार्थं कथं यथा।

स्वचित्तज्ञानमज्ञानाद् यथा बुद्धस्य गोचरः॥

18. प्रसङ्गपूर्वकं व्याख्यात –

कर्मणो वासनाऽन्यत्र फलमन्यत्र कल्प्यते।

तत्रैव नेष्यते यत्र वासना किं नु कारणम्॥

**अथवा**

उक्तं यथा तदाभासा विज्ञप्तिः स्मरणं ततः।

स्वप्ने दृग्विषयाभावं नाप्रबुद्धोऽवगच्छति॥

19. सम्यक्तया प्रसङ्गपूर्वकं व्याख्यात-

षट्केन युगपद्योगात् परमाणोः षडंशता।

षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रकः॥

**अथवा**

प्रत्यक्षबुद्धिः स्वप्नादौ यथा सा च यदा तदा।

न सोऽर्थो दृश्यते तस्य प्रत्यक्षत्वं कथं मतम्॥

20. सप्रसङ्गं व्याख्यात-

यतः स्वबीजाद् विज्ञप्तिर्यदाभासा प्रवर्तते।

द्विविधायतनत्वेन ते तस्या मुनिरब्रवीत्॥

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. आचार्यवसुबन्धोः बौद्धदर्शने अवदानं प्रतिपाद्य निबन्धमेकं लिखत।

**अथवा**

विज्ञानवादस्य वैशिष्ट्यप्रदर्शनपुरस्सरं विज्ञप्तिमात्रतावादस्य वैशिष्ट्यं प्रतिपादयत।

**अथवा**

विंशतिकाप्रकरणस्य सारम् अधिकृत्य निबन्धमेकं लिखत।

# A-I/4/1305/22

## प्रथमसत्रार्द्धम्

## चतुर्थपत्रम्

## बौद्धदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. सामणेरस्य प्रथम: संकल्प: क:? पाठ्यांशदिशा लिखत।

**अथवा**

राजवाद: क:? पाठ्यांशदिशा लिखत।

2. भिक्षो: संकल्पं ग्रन्थदिशा लिखत।

**अथवा**

'पथवी, महाराज, लोकं पालेती'ति। कस्य कथनमस्ति?

3. 'यमक' केन पिटकेन सम्बद्ध:?

**अथवा**

को न पटिसंदहती? ग्रन्थदिशा लिखत।

4. किं लक्खणा पञ्ञा?

5. किं लक्खणं सीलं"ति? पाठ्यांशदिशा लिखत।

**अथवा**

किं लक्खणं सद्धा"ति? पाठ्यग्रन्थदिशा लिखत।

6. छ: अञ्ञतित्थकरा के? नामानि लिखत।

**अथवा**

'धातुकथाप्पकरणं' इति ग्रन्थस्य वैशिष्ट्यम्? ग्रन्थदिशा सूचयत।

7. कति कुशला: धर्मा:? पाठ्यग्रन्थदिशा लिखत।

8. मिलिन्दपञ्हो पिटकस्य ग्रन्थोऽस्ति अनुपिटकस्य वा?

9. वीर्यस्य किं लक्षणम्? ग्रन्थदिशा सूचयत।

10. मिलिन्द-नागसेनयोः संवादः अन्तःपुरे जातः अरण्ये वा?

11. 'कतमं नामंति? ग्रन्थदिशा लिखत।

12. किं लक्खणा चेतना"ति? पाठ्यांशदिशा लिखत।

13. किं लक्खणा विञ्ञाणं"ति? पाठ्यांशदिशा लिखत।

14. वेदना कतिधा? नामानि लिखत।

15. अभिधम्मपिटके कति ग्रन्थाः? नामानि लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. नागसेनस्य परिचयं संक्षेपेण लिखत।

17. मिलिन्दनागसेनयोः पूर्वयोगकथा लेखनीया।

**अथवा**

नागसेनस्य पाटलिपुत्रगमनस्य वर्णनं कुरुत।

18. सप्रसङ्गव्याख्या विधेया -

बहुस्सुतो चित्रकथी, निपुणो च विसारदो।
सामयिको च कुसलो, पटिभाने च कोविदो॥

19. ससन्दर्भं व्याख्यात-

कथिता मया बहु दिट्ठा, साकच्छा ओसटा बहू।
तं तादिसं भयं आसि, अज्ज तासो यथा मम॥

**अथवा**

मनसिकारलक्षणप्रश्नः कः? वर्णनं कुरुत।

20. 'मिलिन्दपञ्हो' ग्रन्थानुसारेण एकोनविंशतिः विद्याः लेखनीयाः।

**अथवा**

सप्रसङ्गव्याख्या विधेया –

नाभिनन्दामि मरणं, नाभिनन्दामि जीवितं।

कालञ्च पटिकङ्खामि, निब्बिसं भतको यथा॥

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. सागलनगरस्य वैभववर्णनमधिकृत्य निबन्धमेकं लिखत।

**अथवा**

'मिलिन्दपञ्हो' इति ग्रन्थस्य दार्शनिकमहत्त्वं प्रतिपादयत।

**अथवा**

'मिलिन्दपञ्हो' ग्रन्थस्य द्वितीयपरिच्छेदस्य परिचयो देयः।